धातुके वा श्यन् सेडमन्तत्वात् अतिङि णिति ञिति चिणि परे न वृद्धिः। कर्त्तरि क्रम्यति क्रामति। क्रम्येत्-क्रामेत्। क्रम्यतु क्रामतु। अक्रम्यत् अक्रामत्। अक्रमीत्। चक्राम। क्रमिता क्रम्यात् क्रमिष्यति। अक्रमिष्यत्। कर्म्मणि क्रम्यते। अक्रमि। णिचि दृश्यमुखो वा वृद्धिः। क्रमयति-ते। अचिक्रमत्-त। कर्म्मणि क्रम्यते। अक्र(क्रा)मि। क्र(क्रा)मितासे क्रमयितासे। कृत्सु क्रमणीयम्। क्रमितव्यम् क्रम्यम् क्रमणम्। क्रमकः। क्रमी। क्रमिता। क्रान्तिः। क्रमितुम्। उदित् क्रमित्वा क्रान्त्वा। संक्रम्य। क्रमं क्रमम्। णिचो णमुलि वा वृद्धिः क्र(क्रा)मं क्र(क्रा)मम्। क्रम्यन् क्रामन्। क्रमिष्यन् क्रमिष्यमाणः। णयन्तस्य क्रमयिता क्रमितः। क्रमयितुम्। क्रमयितव्यम्। स्त्रियामस्ति युच् क्रमणा। क्रम—यन् माणः क्रमयिष्यन्। कर्म्मणि क्रम्यमाणः। क्र(क्रा)मिष्यमाणः। क्रमयिष्यमाणः। सनि चिक्रमिषति आत्म॰ चिक्रंसते। "समुद्रात् पश्चिमे पूर्वं दक्षिणादपि चोत्तरात्। क्रामत्यनुदिते सूर्य्ये वाली व्यपगतक्लमः" रामा॰ कि॰ ८० अ॰। "देवा इमाल्लँ ोकानक्रमन्त" शत॰ ब्रा॰ ६।७।२।१० "विष्णुस्त्वा क्रमताम्" यजु॰ १।६। "पादेनाक्रम्यारोहतु" वेददी॰। "हत्वा रक्षांसि लवितुमक्रमीन्मारुतिः पुनः" भट्टिः "हुतोद्विजाग्र्यैरभिपूज्यमानः चक्राम वज्रीव दितेः सुतेषु" भा॰ आ॰ १९२ अ॰। "क्रमं बबन्ध क्रमितुं सकोपः" "क्रन्त्वा क्रन्त्वा स्थितं क्वचित्" भट्टिः। परोपक्रमवत् अप्रतिबन्धादौ आत्म॰। "न तत्र क्रमते मृत्युर्न जरा न च पावकः" भा॰ आनु॰ ८३ अ॰। "हरेयदक्रामि पदैककेन खम्" नैषधे अक्रामीत्यसाधु। स्वार्थे णिच् कथञ्चित् साधु इत्यन्ये। निष्ठायां नेट् क्रान्त इत्यादि कौटिल्ये यङ् चंक्रम्यते नागः। "सोऽपि चंक्रम्यमाणः कूपे पपात" भा॰ आ॰ ७०० श्लो॰।

अति+अतिक्रमणे उल्लङ्घने सक॰। "स नदीः पर्वतांश्चापि सलिलानि सरांसि च। अचिरेणातिचक्राम खेचरः खे चरन्निव" भा॰ आ॰ ४६५२ श्लो॰। "अत्यक्राममिमान् मासां स्तन्नधं परिचिन्तयन्" रामा॰ युद्ध॰ ८८ अ॰।

अभि+अति+आभिमुख्येनातिक्रमणे सक॰। "न दिष्टमभ्यतिक्रान्तुं शक्यं बुद्ध्या बलेन च" भा॰ स॰ १०५१ श्लो॰।

वि+अति+वैपरीत्येन क्रमणे। "तदन्तः पुरमासाद्य व्यतिचक्राम तं जनम्" रामा॰ बाल॰ ७० अ॰। विशेषेण अतिक्रमे च। "स लोकानाहिताग्नीनामृषीणां पुण्यकर्म्मणाम्। देवानाञ्च व्यतिक्रम्य ब्रह्मलोकमवाप ह" रामा॰ आर॰ ६ अ॰। "एवं हि सुमहान् कालो व्यत्यक्रामत तस्य वै" भा॰ अनु॰ ४५५ श्लो॰। "विवाहे च व्यतिक्रमः" उद्वा॰ त॰

सम्+अति+सम्यगतिक्रमणे। "अवन्तीश्चावन्तञ्च समतिक्रम्य पर्वतम्" भा॰ व॰ २२१ श्लो॰

अधि+आधिक्येन क्रमणे

अनु+परिपाट्या क्रमणे। "श्रद्धा रतिर्भक्तिरनुक्रमिष्यति" भा॰ ३।२५।२५५। "महर्षिभिरनुक्रान्तं धर्म्मपन्थानमास्थितः" रामा॰ उ॰ ४७ अ॰। "परिपाटी त्वनुक्रमः" अमरः।

अप+ अपसरणे अक॰ "हित्वा सेनामपचक्राम चापि" भा॰ आ॰ १।१७७ श्लो॰।

अभि+आभिमुख्येन गमने सक॰ "तमभिक्रम्य सर्वेऽद्य वयं वाऽर्थामहे वसु" भा॰ व॰ ८२१ अ॰। "प्रदक्षिणमभिक्रम्य सर्वे प्राञ्जलयः स्थिताः" भा॰ अनु॰ ६०४७० "आरम्भे च "नेहाभिक्रमनाशोऽस्ति" गीता अभिक्रमः आरभ्यमाणः।

अव+अपसरणे हिंसने च सक॰। "अवक्रामन्तः प्रपदैरमित्रान्" ऋ॰ ६।७५।७। "अपक्रामन्तः हिंसन्तः" भा॰।

अनु+अव+अनुगमने प्रवेशे च सक॰। "एतास्तेजोमात्राः समभ्याददानो हृदयमेवान्ववक्रामति" शत॰ ब्रा॰ १४।७।२।१। "स्मृतिकाले हृदयस्थां बुद्धिमेवान्वागच्छति" भा॰।

आ+बलपूर्वकाक्रन्दने। "आक्रामन्नागभवने तदा नागकुमारकान्" भा॰ आ॰ ५०१८ श्लो॰। "आरोहणे च आक्रान्तिसम्मानितपादपीठम्" कुमा॰। उद्गमे अक॰ तत्र दीप्त्यान्वितस्योद्गमे आत्म॰। "भाद्रकृष्णचतुर्द्दश्यां यावदाक्रमते जलम्। तावद्गर्भं विजानीयात्तदूर्द्धं तीरमुच्यते" प्रा॰ त॰ दानधर्म्मः। एवं सूर्य्य आक्रमते इत्यादि। अन्यत्र आक्रामति। अत्यादिपूर्वकस्याङस्तु तत्तदर्थविशिष्टारोहणादिद्योतकता। "सममेव समाक्रान्तं द्वयं द्विरदगामिना" रघुः

उत्+उदये अक॰। "यज्ञस्य शीर्षाच्छिन्नस्य उदक्रामत्" शत॰ ब्रा॰ १४।१।२।१२। ऊर्द्धक्रमणे च "न तस्य प्राणा उत्क्रामन्ति इहैव समवलीयन्ते" श्रुतिः। "कस्मिन्नुत्क्रान्ते सर्व्वमिदमुत्क्रान्तम्" श्रुतिः। "तान् ज्ञात्वा पतगश्रेष्ठः सर्वानुत्क्रान्तजीवितान्" भा॰ आ॰ २२ अ॰। "विष्वङ्ङन्या उत्क्रमणे भवन्ति" छा॰ उप॰। उल्लङ्घने सक॰। उत्क्रमः।—वैपरीत्येन क्रमणे अक॰ "क्रमोत्क्रमान्मेषतुलादिमानम्" ज्यो॰ त॰

अनु+उद्+उत्क्रमणानुसरणे सक॰। "प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति" शत॰ ब्रा॰ ७।२।२।

वि+उद्+वैपरीत्येन विशेषेण च लङ्घने सक॰ ऊर्द्ध्वं गतौ अक॰